No 34

॥अथाश्वत्थोद्यापनप्रारंभः॥

पत्र८

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY

श्रीगणेशायनमः॥ अथअश्वत्थोद्यापनं तदुत्तरंवा नकीये। स्थापनादष्टमेवर्षेद्वा
दशेकादशेपिवा उत्तरायणेगुरुशुक्रोदयेमाघफाल्गुनचैत्रवैशाखेशुक्लपक्षेशु
भेऋक्षेसुवारतिथिलग्नके स्कंधपर्णांकुरान्वितेवि घ्नहृावा गत्य नभिहृते
अश्वत्थोद्यापनंकुर्यात् तत्रादौकनककुंडलेकनकसूत्र कनकमौंजीहोम
द्रव्याणि सर्वसंभारान् यथासंभवं संपाद्य अश्वत्थस्यचतुरस्रंवेदिकांवि
धायअश्वत्थमूलेवर्तुलंचतुरस्रंवा आलबालंकृत्वा तत्रतुलसी ग्रहक्षत्रारवां रांम.
शमीचरोपयित्वाअश्वत्थवेदिकायांचतुरस्रंसमेताश्चतुर्द्वारंचतुर्हस्तं अधिकं १

वामंडपंअश्वत्थास्पर्वपश्चिमेउत्तरेवाउक्तलक्षणंमंडपंअन्यंवाकृत्वास्वगृह्योक्त
तिर्विदाहिष्टेमुहूर्त्तेप्रधानसंकल्पंकुर्यात् तद्यथातिथ्यादिसंकीर्त्य। आत्म था
नःअखिलपापक्षयाभीष्टसिद्धिपूर्वकंआत्मनासहएकविंशतिपुरुषोद्धर्तु
कामःश्रीप०र्थंअश्वत्थोद्यापनं तथा अश्वत्थस्याभीष्टसिद्धिदात्वार्थंतदुप
नयनंचकरिष्ये तदंगविहितंगणेशपूजनं पुण्याहवाचनंमातृकापूज
नं नांदीश्राद्धंआचार्यादिवर्णंचकरिष्ये इतिसंकल्पस्वगृह्यविधिनातानिकृ
त्वाआचार्यादीन् वृणुयात् अस्मिन्कर्मणि आचार्यत्वामहंवृणे वृतोस्मीति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२

सर्वदत एवंब्राह्मणंसद्स्यंउपदृष्टारं सर्वान्मधुपर्कादिनासंपूज्यप्रार्थये
त् अस्ययागस्यनिष्पत्तौभवंतोभ्यर्थितामया कृष्णसंनैश्चकर्त्तव्यंकर्मेदंवि
धिपूर्वकं ततःस्वगृह्येणवगृह्मरवादिविधायततःसत्विक्सपत्नीकोयजमा
नःसंपूर्णकलशंगृहीत्वाःमद्रंकर्णेभिरितिमंत्रेणमंगलतूर्यघोषेणसहअश्वत्थ
मंडपप्रदक्षिण्येनमंडपपश्चिमद्वारमागत्यतत्रधरांसंपूज्यमंडपंप्रविश्यक
लशंअश्वत्थसमीपेनिधायनिर्ऋतिवरुणमध्येउपविशेत् ततःआचार्यःआ
चार्यकर्मकरिष्ये।शरीरस्थ्यर्थंऋतमृध्यादिपौरुषजपंचकृत्वायदत्रसंस्थि

आ० २ २

तमितिसर्षपलाजान्विकीर्यसाधितपंचगव्येनकुशैःसर्वत्रप्रोक्षणं शुंचीवा
ह्येतिआपोहिष्ठेतिउत्तरनारायणेनचकार्यं। ततःदेवाःआयांतुयातुधानाः
आयांतुविशोदेवयजनंरक्षस्वेतिस्वस्त्ययनंतार्क्ष्यमितिपठेत् ततःयथोक्तमं
डपकरणैमत्कृतरुद्रानुष्ठानकौमुदीस्थप्रकारेणमंडपंप्रजयेत् साधारणमंड
पेतुप्राक्द्वारेअमंत्रकंचूतपल्लवतोरणं।दक्षिणेप्लक्षपल्लवतोरणंउत्तरेअ
श्वत्थपल्लवतोरणं बध्वा तथैवप्रागादिचतुष्टयेश्वेतकृष्णहरितरक्तपताकाः
अश्वत्थशिरसिविचित्रध्वजंचबध्वातथैवप्रागादिद्वारचतुष्टयेवेदादिक्रमे
पश्चिमेवटपल्लवतोरणं

प

णद्वौद्वौएकंवाजपार्थंब्राह्मणंवृणुयात् तत्तः आचार्यःअश्वत्थस्यहरिद्रातैल
रोपणादिलौकिकंविधायअश्वत्थवेदिकायांईशान्यप्रदेशेकृता ग्मकर्त्तार
णसौवर्णीप्रतिमायांइदंविष्णुरितिमंत्रेणवासुदेवंतद्धामतः अधःस्थायोवर्ण
तिमंत्रेणरुक्मिणींतद्दक्षिणतः सद्यासस्येतिमंत्रेणसत्यभामां ततः प्रक्षोदस
धायसेतिमंत्रेणसरस्वतींआत्मनइंद्रेतिगणपतिंचावाह्यपौरुषेणसंपूज्यतत्त
अश्वत्थपरितःपीठसमंततोवा अष्टौलोकपालान्स्थापनक्रमेणसंस्थाप्यत राम॰
तःपूर्वकलशेक्षीरोदकंआपोहिष्ठेतिनवर्चेनसक्तेनद्वितीयेगंधोदकंआ ३

नोभद्रेतिदशर्चेन तृतीयेक्षीरोदकंस्वस्तिनोमिमीतिमंत्रेणपंचर्चेन। चतुर्थेपं
चगव्यंशन्नइंद्राग्नीतिपंचदशर्चेन पंचमेहरिद्रोदकंएतोन्विंद्रेतिऋचेन षष्ठ
कलशेसर्वौषध्युदकंसमुद्रज्येष्ठाइतिचतसृभिः सप्तमेकुशोदकंयादिव्या
इतिअष्टमेगंगोदकंप्रसवआपोमइतिनवर्चेन उक्तप्रकारेणपूर्णपात्रांत
रुलात्तत्रपूर्वादिक्रमेणइंद्रादीन्तत्तन्मंत्रै रावाह्यसंपूज्येत् ततःअश्वत्थं
पुरुषसूक्तेनअथर्वशिरसाचसंशोध्यपंचामृताभिषेकंचकृत्वाकाषाययुग्म
वस्त्रेणावेष्यततःपूर्वादिदिक्षुचत्वारिस्थंडिलानिविधायतेषुहोमार्थंचतुर

आचार्यान्कृत्वातेस्वगृह्यविधिनाअग्निंस्थापयेयुः।अत्रकेचनईशानपूर्व
योर्मध्येग्रहहोमादिकंनेपंचमंइच्छंतिबहवःपूर्वकुंडेएवग्रहप्रधानहोमादि
कंकुर्वंति।पूर्वंअकृतग्रहयज्ञेइदानींईशानवेदिकायांमत्कृतरुद्रानुष्ठा
नकौमुदीस्थप्रकारेणग्रहान् आवाह्यसंपूज्यअन्वाधध्यात्।अत्रपूर्वकुंडे
पूर्वंग्रहयज्ञेआदित्यादिनवग्रहान् अमुकसंख्यैःअर्कादिसमित्चर्वाज्यद्र या
व्यैःअधिदेवताःप्रत्यधिदेवताश्चअमुकसंख्यैःमातैरेवद्रव्यैःतथा श्रानोभद्रे राम०
तिमंत्रेणविश्वान्देवान्चरुद्रव्येणअष्टोत्तरसंख्यया।तथादामोदरादिपी ४

वदेवताःअश्वत्थसमित्चर्वाज्यद्रव्यैःअष्टोत्तरसंख्यया।ब्रह्मादिदेवताःइंद्रा
दिलोकपालांश्चएकैकयाज्याहुत्यायक्ष्ये।पंचपक्षेआदौतत्रअग्निप्रणयनं॥
तस्माच्चतुर्षुअग्निप्रणयनंतत्रग्रहहोमः दामोदरादीनांहोमः ब्रह्मादीनांच।पू
र्वकुंडेविश्वेदेवानांलोकपालानांचहोमः। अथदक्षिणकुंडेगणपतिंतिला
ज्यद्रव्येणअष्टोत्तरशतसंख्यया यायक्ष्ये।पश्चिमेअष्टौलोकपालान्वास्तुंचन्नामी
समिद्भिःअष्टोत्तरशतसंख्यया अष्टाविंशतिसंख्ययावायक्ष्ये।उत्तरेनारायणंपौरुषेणयाज्यं प्रत्यृचंआज्यद्रव्येणअष्टोत्तरशतसंख्यया यायक्ष्ये एवंतत्र

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC S

न्मंत्रैर्होमंसंपाद्यस्विष्टकृदादिबल्यंतंकृत्वाअधिवसेत्पुराणादिनारात्रिंनिन
येत् केचनकाषायवस्त्रदानांतंकृत्वापरेह्नरेवहोमादिकंइच्छंतिप्रातःपीठदे
वताःसंपूज्यअष्टकलशदेवताःविसृज्याग्निंब्राह्मणैःतान्गृह्णीयात्वाआ
चार्यःपवमानःस्वर्जनइत्यनुवाकेनअग्न्वर्थंत्रिःपरिषिच्यकिंचिदवशिष्टो
दकान्कलशान्पूर्वस्थानेषुस्थापयेत्।ततःयजमानःआचार्योवाअग्न्वर्थंप
श्चिमेस्थंडिलेसंस्कारहोमंकुर्यात् तद्यथा।अग्न्वर्थस्यव्याहृतिद्वारपुंसवनादिस
मावर्तनांतान्संस्कारान्करिष्ये इतिसंकल्प्यअग्निंपवमानंप्रतिष्ठाप्यअन्वा

राम
५

दध्यात् अत्रप्रधानं अग्निंवायुंसूर्यंप्रजापतिंचआज्यद्रव्येणप्रतिसंस्कारं
चतुःसंख्याकुतिभिःयक्ष्ये।प्रतिसंस्कारहोमांतेवनस्पतेशतवल्शइतिमंत्रेण
अग्न्वर्थंस्पृशेत्।एवंउपनयनपर्यंतंकृत्वायजमानाग्न्वर्थांतरालेपटंधृत्वास्रुग्
दुर्त्तेमंगळपावापुरःसरंतदेवलग्नमितिपठित्वातेअंतःपटंनिःसार्यध्रुव
स्रुक्रुंपठित्वायेयज्ञेनेतिवर्गपंचकंशारवांतरस्थमंत्रांश्चपठित्वाकौपीनंकनक
मयींदर्भमयींवामेखलांदंडंचतत्तन्मंत्रैः दत्वासप्रणवांसव्याहृतिकांसशिरस्का
गायत्रीउपदेशवत्पठेत् इत्युपनयनं।ततःमातृनाम्न्यादिसमावर्त्तनांतंकृ

त्वाकनकंकुंडलेअलंकारांश्चदत्वाआयुष्यंवर्चस्यमितिपरित्वामौंजीविसर्जनं
कृत्वाममाग्नेइतिसक्तंपरित्वातत:स्विष्टकृदादिहोमशेषंसमापयेत् अथविवा
ह: तत्रादौअश्वशालवालेशतकुंभमितंशुद्धजलंक्षिप्त्वादुग्धमधघृतकुंभैश्च
सिक्त्वावस्त्रयुग्मेनअश्वत्थतुलस्यादिशारवा:वेष्टयित्वातुलस्या:कंचुकींवस्त्र
कंठभूषणंमौक्तिकंकर्णपादभूषणंचदत्वा।अश्वत्थस्यविवाहविधिंकरिष्य
इतिसंकल्प्य पूर्वसंस्कारहोमस्थंडिलोत्तरप्रदेशेस्थंडिलंनिर्माययोजकनाम राम
नंअग्निंप्रतिष्ठाप्यअन्वाधत्ते।अत्रप्रधानं ब्रह्माणं। घासस्पर्णेतिमंत्रेणअ ६

ष्टोत्तरशतसंख्ययातिलाज्यद्रव्येण।तद्यथा।महाव्याहृतिभि:तिलाज्यद्रव्येण
शतं अष्टोत्तरंसंख्ययायश्चै।महाव्याहृतयस्तु।भूरग्नयेचपृथिव्यैचमहतेचस्वाहा
भुवोवायवेचांतरिक्षायचमहतेचस्वाहा।सुवरादित्यायचदिवेचमहतेचस्वाहा
भूर्भुवस्सुवरुक्षंदृमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेच स्वाहा।एवंहोमंकृत्वा।
तुलस्यश्वत्थयो:चतुर:शारवामयान्हस्तान्गृह्णामीतिमंत्रेणयोजयेत्।तत
स्विष्टकृदादिहोमशेषंसमाप्य।ततोश्वत्थंपुरुषसूक्तेनषोडशोपचारै:संपू
ज्यअश्वत्थं तुलसींचप्रार्थयेत्। अश्वत्थस्त्वंजगंनाथ:पुरादेवैर्विनिर्मित:पा

पात्संत्राहिनोदेवपुण्यंदेहिमहत्फलं।क्षीरोदधिसमुद्भूतेतुलसीहरिवल्लभे।अ
श्वत्थोद्यापनंपुण्यंमह्यंदेहिश्रियेनमः अतःआचार्यःक्षेत्रपालबलिं दत्वासर्वेआ
चार्याःस्वस्वकुंडेपूर्णाहुतिंहुत्वाकर्मशेषंसमाप येयुःततःयजमानःपीठपूजा
दिविधायकृतस्यअश्वत्थोद्यापनस्यसांगतासिध्यर्थंआचार्यादिभ्योदक्षिणाप्र
दानमहंकरिष्ये इतिसंकल्प्य।पूजापूर्वकंदक्षिणांदत्वाततःआचार्यादयःपूर्व
स्थापिताष्टकलशोदकेनदूर्वापल्लवैःसपत्नीकंयजमानंअभिषिंचेयुः तत्रमंत्राः राम
आनोभद्रेतिदशर्चंसूक्तं।अस्यवामस्येतिद्व्यृचंचशतं।ऋचंसूक्तं पवोमात्रये ७

तिचतुर्दशर्चंसूक्तं॥मुंचामित्वेतिपंचदशर्चंसूक्तं।समुद्रज्येष्ठाइत्यादयः।स्करा
स्त्वामभिषिंचंत्वित्याद्याःएवंअभिषिक्तोयजमानःतिलकादिधृत्वाअग्निंपी
ठदेवतांचसंपूज्यउत्तिष्ठब्रह्मणस्पतेइतिउत्थाप्यसोपस्करंपीठंआचार्यायदत्वामं
डपसंपूर्णतासिध्यर्थंगांचदत्वामंडपंसदस्यायवाआचार्यायदत्वाभूयसींचदत्वा
कर्मेश्वरार्पणंकृत्वाज्ञाताधिकान्ब्राह्मणान् भोज्यशेषंगृहीत्वाअश्वत्थोद्याप
नपूर्णतांवाचयित्वाइष्टजनैःसहभुंजीत।एवंयःकुरुतेतस्यवर्धतेश्रियमायुषं।
कुलकोटिंसमुध्दृत्यविष्णुलोकेमहीयते इतिश्रीनकीये।अश्वत्थोद्यापनंसमाप्तं॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

1034

॥इत्यभ्यर्थोद्यापनंसमाप्तं॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

राम.
८